# pa nchamukhihanumatkavacham

# પઞ્ચમુખિહનુમત્કવચમ્

## Document Information

Text title : panchamukhihanumatkavacham (From Suradshanasamhita)

File name : panchamukhihanumatkavacham.itx

Category : kavacha, hanumaana, hanuman

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran psaeaswaran at gmail

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Source : Suradshanasamhita

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# પઞ્ચમુખિહનુમત્કવચમ્

(સુદર્શનસંહિતાતઃ)

અસ્ય શ્રીપઞ્ચમુખિહનુમત્કવચસ્તોત્રમન્ત્રસ્ય, બ્રહ્મા ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીહનુમાન્ દેવતા । રાં બીજમ્ । મં શક્તિઃ ।
ચન્દ્રઃ કીલકમ્ ।
ૐ રૌં કવચાય હુમ્ । હ્રૌં અસ્ત્રાય ફટ્ ।
ૐ હરિમર્કટમર્કટાય સ્વાહા
ૐ નમો ભગવતે પઞ્ચવદનાય પૂર્વકપિમુખાય
સકલશત્રુસંહરણાય સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય દક્ષિણમુખાય કરાલવદનાય નરસિંહાય
સકલભૂતપ્રમથનાય સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય પશ્ચિમમુખાય ગરુડાનનાય
સકલવિષહરાય સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય ઉત્તરમુખાય આદિવરાહાય
સકલસમ્પત્કરાય સ્વાહા ।
ૐ નમો ભગવતે પઞ્ચવદનાય ઊર્ધ્વમુખાય
હયગ્રીવાય સકલજનવશકરાય સ્વાહા ।

ન્યાસાઃ-
અસ્ય શ્રીપઞ્ચમુખિહનુમત્કવચસ્તોત્રસ્ય શ્રીરામચન્દ્ર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીરામચન્દ્રો દેવતા । સીતા ઇતિ બીજમ્ ।
હનુમાનિતિ શક્તિઃ । હનુમત્પ્રીત્યર્થે જપે વિનિયોગઃ ।
પુનર્હનુમાનિતિ બીજમ્ । ૐ વાયુપુત્રાય ઇતિ શક્તિઃ ।
અઞ્જનાસુતાયેતિ કીલકમ્ ।
શ્રીરામચન્દ્રવરપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ૐ અઞ્જનાસુતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।

ૐ રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ૐ વાયુપુત્રાય મધ્યમાભ્યાં નમઃ ।
ૐ અગ્નિગર્ભાય અનામિકાભ્યાં નમઃ ।
ૐ રામદૂતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ સીતાશોકનિવારણાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

ૐ અઞ્જનાસુતાય હૃદયાય નમઃ ।
ૐ રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ વાયુપુત્રાય શિખાયૈ વષટ્ ।
ૐ અગ્નિગર્ભાય કવચાય હુમ્ ।
ૐ રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ૐ પઞ્ચમુખિહનુમતે અસ્ત્રાય ફટ્ ।
ૐ પઞ્ચમુખિહનુમતે સ્વાહા ઇતિ દિગ્બન્ધઃ ।

ધ્યાનં-
વન્દે વાનરનારસિંહખગરાટ્ક્રોડાશ્વવક્ત્રાન્વિતં
દિવ્યાલઙ્કરણં ત્રિપઞ્ચનયનં દેદીપ્યમાનં રુચા ।
હસ્તાબ્જૈરસિખેટપુસ્તકસુધાકુમ્ભાઙ્કુશાદ્રિં હલં
ખટ્વાઙ્ગં ફણિભૂરુહં દશભુજં સર્વારિવીરાપહમ્ ॥

શ્રીરામદૂતાય આઞ્જનેયાય વાયુપુત્રાય મહાબલાય
સીતાશોકનિવારણાય, મહાબલપ્રચણ્ડાય, લઙ્કાપુરીદહનાય,
ફાલ્ગુનસખાય કોલાહલસકલબ્રહ્માણ્ડવિશ્વરૂપાય,
સપ્તસમુદ્રાન્તરાલલઙ્ઘિતાય, પિઙ્ગલનયનાયામિતવિક્રમાય,
સૂર્યબિમ્બફલસેવાધિષ્ઠિતપરાક્રમાય,
સઞ્જીવન્યા અઙ્ગદલક્ષ્મણમહાકપિસૈન્યપ્રાણદાત્રે
દશગ્રીવવિધ્વંસનાય, રામેષ્ટાય, સીતાસહિતરામચન્દ્રવરપ્રસાદાય ।
ષટ્પ્રયોગાગમપઞ્ચમુખિહનુમન્મન્ત્રજપે વિનિયોગઃ ।
ૐ હરિમર્કટમર્કટાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય, વં, વં, વં, વં વં વૌષટ્ સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ફં, ફં, ફં, ફં, ફં, ફટ્ સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ખં, ખં, ખં, ખં, ખં, મારણાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ઠં, ઠં, ઠં, ઠં, ઠં, સ્તમ્ભનાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ડં, ડં, ડં, ડં, ડં

આકર્ષણાય સકલસમ્પત્કરાય
પઞ્ચમુખિવીરહનુમતે સ્વાહા ।
ઉચ્ચાટને
ૐ ઢં, ઢં, ઢં, ઢં, ઢં, કૂર્મમૂર્તયે પઞ્ચમુખિહનુમતે
પરયન્ત્રતન્ત્રોચ્ચાટનાય સ્વાહા ।
કં, ખં, ગં, ઘં, ઙં, ચં, છં, જં,
ઝં, ઞં, ટં, ઠં, ડં, ઢં, ણં,
તં, થં, દં, ધં, નં, પં, ફં,
બં, ભં, મં, યં, રં, લં, વં,
શં, ષં, સં, હં, ક્ષં, સ્વાહા ઇતિ દિગ્બન્ધઃ ।
ૐ પૂર્વકપિમુખાય પઞ્ચમુખિહનુમતે ઠં, ઠં, ઠં, ઠં, ઠં,
સકલશત્રુસંહરણાય સ્વાહા ।
ૐ દક્ષિણમુખાય પઞ્ચમુખિહનુમતે કરાલવદનાય નરસિંહાય
હ્રાં, હ્રાં, હ્રાં, હ્રાં, હ્રાં સકલભૂતપ્રેતદમનાય સ્વાહા ।
ૐ પશ્ચિમમુખાય ગરુડાસનાય પઞ્ચમુખિવીરહનુમતે
મં, મં, મં, મં, મં, સકલવિષહરાય સ્વાહા ।
ૐ ઉત્તરમુખે આદિવરાહાય લં, લં, લં, લં, લં નૃસિંહાય
નીલકણ્ઠાય પઞ્ચમુખિહનુમતે સ્વાહા ।
ૐ અઞ્જનાસુતાય વાયુપુત્રાય, મહાબલાય, રામેષ્ટફાલ્ગુનસખાય
સીતાશોકનિવારણાય, લક્ષ્મણપ્રાણરક્ષકાય, કપિસૈન્યપ્રકાશાય,
દશગ્રીવાભિમાનદહનાય, શ્રીરામચન્દ્રવરપ્રસાદકાય, મહાવીર્યાય,
પ્રથમબ્રહ્માણ્ડનાયકાય, પઞ્ચમુખિહનુમતે,
ભૂત-પ્રેતપિશાચ-બ્રહ્મરાક્ષસ-શાકિની-ડાકિની-
અન્તરિક્ષ-ગૃહ-પરયન્ત્ર-પરતન્ત્ર-સર્વગ્રહોચ્ચાટનાય,
સકલશત્રુસંહરણાય, પઞ્ચમુખિહનુમદ્વરપ્રસાદાય, સર્વરક્ષકાય
જં, જં, જં, જં, સ્વાહા ।

પઠિત્વેદં તુ કવચં મહાન્તં કવચં પઠેત્ ।
એકવારં પઠેન્નિત્યં સર્વશત્રુનિવારણમ્ ॥ ૧॥

દ્વિવારં તુ પઠેન્નિત્યં પુત્રપૌત્રપ્રવર્દ્ધનમ્ ।
ત્રિવારં પઠતે નિત્યં સર્વસમ્પત્કરં પરમ્ ॥ ૨॥

ચતુર્વારં પઠેન્નિત્યં સર્વમર્ત્યવશઙ્કરમ્ ।

પઞ્ચવારં પઠેન્નિત્યં સર્વરોગનિવારણમ્ ॥ ૩॥

ષડ્વારં તુ પઠેન્નિત્યં સર્વદેવવશીકરમ્ ।
સપ્તવારં પઠેન્નિત્યં સર્વકામાર્થસિદ્ધિદમ્ ॥

અષ્ટવારં પઠેન્નિત્યં સર્વસૌભાગ્યદાયકમ્ ।
નવવારં પઠેન્નિત્યં સર્વૈશ્વર્યપ્રદાયકમ્ ॥ ૫॥

દશવારં પઠેન્નિત્યં ત્રૈલોક્યજ્ઞાનદર્શનમ્ ।
એકાદશં પઠેન્નિત્યં સર્વસિદ્ધિં લભેન્નરઃ ॥ ૬॥

કવચં સ્મૃતિમાત્રેણ મહાલક્ષ્મીફલપ્રદમ્ ।
તસ્માચ્ચ પ્રયતા ભાવ્યં કાર્યં હનુમતઃ પ્રિયમ્ ॥ ૭॥

(શ્રીચિન્તામણિરામભદ્રે સુદર્શનસંહિતાયાં)

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*pa nchamukhihanumatkavacham*
pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*